## राजाहःसखिभ्यष्टच् । (९१/७८८)

राजन् अहन् सखि इत्येवमन्तात् [1]प्रातिपदिकात् टच् प्रत्ययो भवति[2] । महाराजः । मद्रराजः[3] । परमाहः । उत्तमाहः । [4]राज्ञः सखा राजसखः । [5]ब्राह्मणसखः । इह कस्मान् न भवति, मद्राणां राज्ञी मद्रराज्ञी? लिङ्गविशिष्टपरिभाषया (व्या. प. २९) प्राप्नोति ? लघ्वक्षरस्य पूर्वनिपाते प्राप्ते राजशब्दस्य सवर्णदीर्घार्थं प्रथमं प्रयोगं [6]कुर्वन्नेतद् ज्ञापयति यस्याकारेण सवर्णदीर्घत्वं सम्भवति तस्येदं ग्रहणम् इति ॥

## गोरतद्धितलुकि । (९२/७२९)

गोशब्दान्तात् तत्पुरुषात् टच् प्रत्ययो भवति,[7] स चेत् तत्पुरुषस्तद्धितलुग्विषयो न भवति । परमगवः । उत्तमगवः । पञ्चगवम् । दशगवम् । अतद्धितलुकि इति किम् ? पञ्चभिर्गोभिः क्रीतः पञ्चगुः । दशगुः । 'तेन क्रीतम्' (५.१.३७/१७०२) इत्यागतस्य आर्हीयस्य ठकोऽध्यर्धपूर्वाद् द्विगोः (५. १. २८/१६९३) इति लुक् । तद्धितग्रहणं किम् ? सुब्लुकि प्रतिषेधो मा भूत् । राजगवमिच्छति राजगवीयति । लुग्ग्रहणं किम् ? तद्धित एव मा भूत् । पञ्चभ्यो गोभ्यः आगतं पञ्चगवरूप्यम्, पञ्चगवमयम् । दशगवरूप्यम्, [8]दशगवमयम् ॥

## अग्राख्यायामुरसः । (९३/७०५)

उरस्शब्दान्तात् तत्पुरुषात् टच् प्रत्ययो[9] भवति, स चेद् उरस्शब्दः[10]अग्राख्यायां भवति । अग्रं प्रधानमुच्यते । यथा शरीरावयवानामुच्यते उरः प्रधानम्, एवमन्योऽपि प्रधानभूत उरस्शब्देनोच्यते । अश्वानामुरः अश्वोरसम्[11] । हस्त्युरसम् । रथोरसम् । अग्राख्यायाम् इति किम् ? देवदत्तस्य उरः देवदत्तोरः ॥

## अनोऽश्मायस्सरसां जातिसञ्ज्ञयोः । (९४/७०६)

अनस् अश्मन् अयस् सरस् इत्येवमन्तात् तत्पुरुषात् टच् प्रत्ययो भवति[12] जातौ सञ्ज्ञायां च विषये । उपानसम् इति जातिः । महानसम् इति सञ्ज्ञा । अमृताश्म इति जातिः । [13]पिण्डाश्म इति सञ्ज्ञा । कालायसम् इति जातिः । लोहितायसम् इति सञ्ज्ञा । मण्डूकसरसम् इति जातिः । [14]जलसरसम् इति सञ्ज्ञा । जातिसञ्ज्ञयोः इति किम् ? सदनः । सदश्मा । [15]सत्सरः ॥

## ग्रामकौटाभ्यां च तक्ष्णः । (९५/७०७)

जातिसञ्ज्ञयोः इति नानुवर्तते । [16]ग्रामकौटाभ्यां परो यः तक्षन्शब्दः तदन्तात् तत्पुरुषात् टच् प्रत्ययो भवति[17] । ग्रामस्य तक्षा ग्रामतक्षः । बहूनां साधारणः इत्यर्थः । कुट्यां भवः कौटः, [18]तस्य तक्षा कौटतक्षः । स्वतन्त्रः कर्मजीवी, न कस्यचित् [19]प्रतिबद्धः इत्यर्थः । ग्रामकौटाभ्याम् इति किम् ? [20]राजतक्षा ॥

---

1. तत्पुरुषात् ब.क.ड.फ.ह. 2. समासान्तः इत्यधिकम् ग.फ. 3. परमराजः इत्यधिकम् ब. क. ड. फ. 4. तस्यैव इत्यधिकम् क. 5. ब्राह्मणस्य सखा इत्यधिकम् ग.फ. 6. कुर्वन्नेव ह. 7. समासान्तः इत्यधिकम् ब.क. 8. दशगवमयम् नास्ति फ. 9. समासान्तः इत्यधिकम् ब.फ. 10. अग्राख्यः ह. 11. अस्युरसम् इत्यधिकम् ह. 12. समासान्तः ब.फ. 13. षण्डाश्म ह. 14. कालसरसम् क. 15. सदयः क.फ, नास्ति ह. 16. ग्राम-कौटशब्दाभ्याम् क. 17. समासान्तः इत्यधिकम् ब.फ. 18. कौटस्य ड. 19. प्रतिरुद्धः क. 20. राज्ञः तक्षा इत्यधिकम् ब.क.ड.ह.